International Journal of Sanskrit Research 2021; 7(1): 97-100

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 97-100
© 2021 IJSR
www.anantaajournal.com
Received: 17-10-2020
Accepted: 25-11-2020

**जगदीशमालः**
विशिष्टाचार्यः
रायगञ्जविश्वविद्यालयः
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
वेस्ट बेङ्गल, भारत

**Corresponding Author:**
**जगदीशमालः**
विशिष्टाचार्यः
रायगञ्जविश्वविद्यालयः
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
वेस्ट बेङ्गल, भारत

# अभिराजराजेन्द्रमिश्रस्य विजयपर्वणो दृश्यकाव्यत्वविचारः

**जगदीशमालः**

**शोधसारः**
अर्वाचीनसंस्कृतसाहित्यजगति अभिराजराजेन्द्रमिश्रमहोदयः प्रख्यातः काव्यकारोऽस्ति। तस्य विविधासु रचनासु साम्प्रतिककालस्य वृत्तान्तं पौराणिकवृत्तान्तं लौकिकवृत्तान्तमितिहासाश्रितवृत्तान्तश्च दरीदृश्यते। मिश्रमहाभागस्येतिहासाश्रितकाव्येषु विजयपर्व काव्यं महत्वपूर्णं स्थानं लभते। काव्यमिदं रचितं हिन्दीसाहित्यकारस्य रामकुमारवर्मामहाभागस्य हिन्दीभाषया विरचितं विजयपर्व नाटकमवलम्बनपूर्वकम्। इतिहासाश्रितं प्रसिद्धं कलिङ्गयुद्धस्य वृत्तान्तमाश्रित्य नाटकमिदं विनिर्मितम्। यद्यपि तत्र विजयपर्व नामके दृश्यकाव्ये कलिङ्गयुद्धेऽशोकस्य विजयसंवादस्य प्रतिफलनमस्ति तथापि तत्र नाटके ऐतिहासिकवृत्तान्तेन साकं काव्यकल्पनमपि विद्यते। संस्कृतकाव्यशास्त्रस्य विधिमवलम्ब्य काव्यमिदं रचितं न वेति, कीदृशं काव्यमिदम्, दृश्यकाव्यमध्ये विजयपर्व नाटकं न वेति विषयमवलम्ब्य प्रस्तुतमिदं शोधपत्रम्।

**मुख्यशब्दाः-** दृश्यकाव्यत्वविचारः, अभिराजराजेन्द्रमिश्रमहोदयः, लौकिकवृत्तान्तमितिहासाश्रितवृत्तान्तश्च

**भूमिका-**
संस्कृतनाट्यतत्त्वस्य आदिग्रन्थोऽद्याप्यस्माकं हस्ते नास्ति। पाणिनेः अष्टाध्यायां शिलालिन-कृशाश्वस्य च नटसूत्रस्य वार्ता श्रुयते। तत्रालोच्यविषयो नाट्यतत्त्व-नर्तक-अभिनेताविषये स्पष्टतया वक्तव्यं न प्राप्यते। तर्हि भरतस्य नाट्यशास्त्रं हि प्रथमं काव्यशास्तरमिति वक्तुं शक्यते। नाट्यशास्त्रे प्राचीनाचार्यस्य नाम यथा कोहलः इति। तस्य ग्रन्थे प्रायश एकशतं प्राचीनश्लोकं उद्धृत्याकारेण लिपिवद्धमस्ति। इदमस्पष्टयुगान्तरं नाट्यशास्त्रे पञ्चसहस्राधिकेन श्लोकेन नाट्यतत्त्वस्य प्रथमं पूर्णाङ्गरूपं दृश्यते। ततः परं नन्दिकेश्वरस्य अभिनयदर्पणम्, अग्निपुराणस्य ३३८ संख्यकोऽध्यायः, धनञ्जयस्य दशरूपकम्, वाग्भट्टस्य काव्यानुशासनमलंकारतिलकं वा, हेमचन्द्रस्य काव्यानुशासनम्, भोजस्य शृङ्गारप्रकाशः सरस्वतीकण्ठाभरणं वा, सागरनन्दीकृतस्य नाटकलक्षणरत्नकोशः, विद्यानाथस्य काव्यालंकारसंग्रहः, विश्वनाथस्य साहित्यदर्पणम्, रूपगोस्वामिनः नाटकचन्द्रिका चैते सर्वाः ग्रन्थाः नाट्यतत्त्वविकाशे उपादानं प्रदत्तवन्तः।
संस्कृतालंकारिकाः नाटकं काव्यस्य हि एकः अन्यतम विभागः इति मन्यन्ते। तस्मात् काव्यतत्त्वालोचकाः नाटकविषये सम्यक्तया आलोचनां कृतवन्तः। तथा भरतादिनाट्यतत्त्वस्य विशेषज्ञोऽपि काव्यस्वरूपम्, अलंकारादिविषये आलोचितवान्। तदपि रसविस्तारं यथा काव्यस्य लक्ष्यं तथा नाटकस्य अपि लक्ष्यम्।
संस्कृतनाट्यकलायाः मुख्यपरिचायकं दृश्यकाव्यम्। यत् कवेर्सृष्टि तत् काव्यम्। तथापि तत् न दृश्यमानम् अभिनयश्च वा तस्य कश्चिदपि न समादरं भवेत्। तदपि वक्तुं शक्यते यत् काव्यस्य प्राग् समालोचना नाट्यकाव्यस्य भूमिका सर्वत्र अग्रगण्यं भवति। काव्यजिज्ञासायाः सर्वस्थले नाट्यजिज्ञासायाः परिसरं सर्वसिद्धम्। "काव्येषु नाटकं रम्यम्"। तर्हि साधारणं निकषा तस्य स्वीकृतिरस्ति। रसात्मकं वाक्यं यथा काव्याश्रयं तथा नाटकस्य वाचिकांशे अपि उपजीव्यम्। तर्हि आचार्यविश्वनाथः तस्य '*साहित्यदर्पणः*' इति ग्रन्थस्य प्रथमपरिच्छेदे काव्यस्य लक्षणस्य प्रसङ्गेनोक्तम्-

"वाक्यं रसात्मकं काव्यम्"।[1]

आचार्यः भामहः शब्दस्य अर्थस्य च सहावस्थानं काव्यम् इत्युक्तवान् –

"शब्दार्थौ सहितौ काव्यम्"।[2]

आचार्यमम्मटो दोषहीनं गुणालंकारयुक्तञ्च शब्दानर्थान् काव्यम् इति कथितवान् –

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।[3]

मम्मटाचार्येण काव्यस्य या धारणा तत् भामहाचार्यः दीर्घकालपूर्वे ददाति स्म। मम्मटाचार्यः सहकारिताया अपरपक्षे भामहचार्यः सहभावस्य वार्ताञ्च कथयति। तदपि द्वयोर्मध्ये कश्चित् अपि भेदो नास्ति। पण्डितराजः जगन्नाथः मम्मटाचार्यस्य भामहाचार्यस्य च काव्यलक्षणस्य अपवादरूपं काव्यलक्षणं कृतवान्। सः काव्यलक्षणे शब्दप्राधानस्य वार्तां कथयति–

"रमणीयार्थप्रतिपादकः शब्दः काव्यम् "।[4]

प्राचीनमतानुसारेणालंकारशास्त्रस्य प्राचीनग्रन्थोऽग्निपुराणेऽपि काव्यस्य लक्षणं प्राप्यते। यथा–

"काव्यं स्फुरदलंकारं गुणवद्दोषवर्ज्जितम्"।[5]

अत अलंकारयुक्तं गुणवर्जितं दोषवर्जितं वाक्यसमूहं हि काव्यम्। साहित्यदर्पणकारो विश्वनाथः काव्यं द्विविधं विभाजयति। यथा-

"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्"।[6]

दृश्यं पर्यवेक्षणं व्यतिरेकेण केवलं श्रवणयोग्यं काव्यं हि श्रव्यकाव्यम्। श्रव्य-दृश्यकाव्येषु अभिनययोग्यं काव्यं दृश्यकाव्यम् – **"दृश्यं तत्राभिनेयम्"।**[7]
साहित्यदर्पणस्य 'मञ्जु' टीकायां दृश्यकाव्यस्य प्रसङ्गेणोक्तम्-

"अभिनययोग्यं काव्यं दृश्यं भवतीति। अस्य हि दर्शनात्मकचाक्षुषप्रत्यक्षयोग्यत्वात् दृश्यत्वमिति। वाचिकाभिनयस्य श्रवणीयत्वेऽपि आङ्गिक-सात्तिकाहार्याणां दर्शनीयतया अधिकेन व्यपदेश इति तस्यापि दृश्यसंज्ञैवेति"।[8]

आलंकारिकानां मतानुसारेण दृश्यकाव्यं 'रूपकम्' इति शब्देनाभिहितम्। साहित्यदर्पणकारः विश्वनाथेनोक्तम्- **"तद्रूपात्तु** रूपकम्"।[9] पुनरपि दशरूपककारस्य धनञ्जयस्य मतानुसारेण रूपकम्- "रूपकं तत्समारोपात्"।[10] वस्तुनि अपरवस्तुन आरोपं रूपकमित्युक्तम्। रूपकालंकारे यथा उपमेयं मुखादौ सादृश्यस्य आधिक्यवशात् उपमानस्य चन्द्रादे आरोपं भवति। उपमानोपमेयोर्मध्ये अभेदः कल्प्यते, तदेव रूपकं कथयति। तथापि दृश्यकाव्येऽपि वेशभूषा–आचार-आचरणं वार्तादिसादृश्यस्याधिकारवशात् अशोकस्यादेरवस्था नटानामुपरि आरोपितं भवति। तदपि अभेदकल्पना भवति उभयोर्मध्ये। तस्मात् कारणात् नाटकं रूपकमिति भवति। यथा-

"तद्दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते "।[11]

धनञ्जयः तस्य दशरूपके नाटकस्य लक्षणं कृतवान् –

"अवस्थानुकृतिर्नाट्यम्"।[12]

रूपकं द्विविधम्। प्रथमे प्रकोष्ठे रूपकस्य दशप्रकारकविभागोऽस्ति। यन्मध्ये नाटकमेकम् उपविभाजनम्। साहित्यदर्पणकारस्य विश्वनाथस्य मतानुसारेण दशविधं रूपकं यथा –

"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
इहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश"।।[13]

द्वितीये प्रकोष्ठे नाटिकादि अष्टादशोपरूपकमस्ति। यन्मध्ये नाटिकेति प्रधानमुपरूपकम्। उपरूपकस्य श्रेणिविभागप्रसङ्गे साहित्यदर्पणकारः विश्वनाथः कथितवान् –

"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।।
संलापकं श्रीगदितं शिल्पकं च विलासिका।

[1] साहित्यदर्पणः (प्रथमःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी, पत्राङ्कः-३४
[2] काव्यालङ्कारः (प्रथमःपरिच्छेदः), रामानन्दशर्मा(सम्पादकः), कारिकासंख्या-१६, पत्राङ्कः-१६
[3] काव्यप्रकाशः (प्रथमोल्लासः), कल्पिका मुखोपाध्यायः(सम्पादिका), सूत्रसंख्या-१, पत्राङ्कः-१६
[4] रसगङ्गाधरः (प्रथमाननम्), सन्ध्याभादुरी, पत्राङ्कः-२
[5] अग्निपुराणम् (सप्तत्रिंशदधिकत्रिशततमोऽध्यायः), पञ्चाननतर्करत्नः(सम्पादकः), श्लोकसंख्या-६, पत्राङ्कः-६७२
[6] साहित्यदर्पणः(षष्ठःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथद्विवेदी(व्याख्याकारद्वयः), कारिकासंख्या-१, पत्राङ्कः-४६६
[7] तदेव, पत्राङ्कः-४६६
[8] तदेव
[9] साहित्यदर्पणः (षष्ठःपरिच्छेदः), उदयचन्द्रवन्द्योपाध्यायः(सम्पादकः), कारिकासंख्याः-२, पत्राङ्कः-१
[10] दशरूपकम्(प्रथमःप्रकाशः), भोलाशंकरव्यासः(सम्पादकः), कारिकासंख्या-७, पत्राङ्कः-४
[11] साहित्यदर्पणः(षष्ठःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी(व्याख्याकारद्वय), पत्राङ्कः-४६७
[12] दशरूपकम्(प्रथमप्रकाशः), भोलाशंकरव्यासः(सम्पादकः), कारिका संख्या-७, पत्राङ्कः-४
[13] साहित्यदर्पणः(षष्ठःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी, कारिका संख्या-३, पत्राङ्कः-४६८

दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च।।
अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् "।।[14]

ततः दशरूपककारः धनञ्जयः कथितवान् –

"वस्तु नेता रसस्तेषां भेदकः"।[15]

अथ वस्तुभेदवशतः नाटकभेदवशतः पूर्वोक्तदशविधरूपकस्य मध्ये भेदः लक्षितः। प्रथमं तथा वस्तुप्रसङ्गेनोक्तम् - "वस्तु च द्विधा"।[16] अथ रूपकस्य मुख्यवस्तु 'आधिकारिकम्', अङ्गभूतवस्तु प्रासङ्गिकञ्च उक्तम्। दशरूपके तस्मादुक्तम् –

"तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः"।[17]

यथा –

"प्रधानभूतमाधिकारिकं यथा रामायणे रामसीता वृत्तान्तम्, तदङ्गभूतं प्रासङ्गिकं यथा तत्रैव विभीषणसुग्रीवादिवृत्तान्तम् इति "।[18]

नाट्यशास्त्रेऽपि एतद् प्रसङ्गेनोक्तम्-

"इतिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत्।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्"।।[19]

साहित्यदर्पणकारेण विश्वनाथेनोक्तम्-

"इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते।
आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम्"।।[20]

प्रासङ्गिकं वस्तु द्विविधम्। यथा- पताका प्रकरी च। अतो वस्तु त्रिविधम्। एतद् विविधं वस्तु पुनरपि प्रख्यातमुत्पाद्यं मिश्रञ्च। पूर्वस्य नवविभाजनं पुनरपि दिव्यं दिव्यादिव्यं मर्तञ्च भेदेन सर्वेषां सम्मिलनेन सप्तविंशतिप्रकारं विभज्यते। तर्हि एतद् वक्तुं शक्यते यत् भारतवर्षेऽपि पाश्चात्यपण्डितानामिव, कर्मक्लान्त-दुःखी-दुर्बलानां मनुष्याणामवसरं विनोदनाय भरतमुनिः दृश्यकाव्यमवतारयति –

"दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाः।
विश्रान्ति जननं काले नाट्यमेतद् भविष्यति"।। [21]

**उपसंहारः-**

रामकुमारवर्मामहोदयकृतस्य विजयपर्व इति हिन्दीनाटकस्य महाराजाभिराजराजेन्द्रमिश्रः संस्कृतानुवादं कृतवान्। महाराजराजेन्द्रमिश्रमहोदयस्य संस्कृतानूदितं विजयपर्वणो दृश्यकाव्यत्त्वं विचारं कृत्वा एतद् सिद्धान्ते उपनीतं यत् विजयपर्व नाटकं स्वतन्त्रं विरचनं ड. रामकुमारवर्मामहोदयस्य। तस्मादाधुनिकनाटकरूपेणाऽभिधीयते। तस्य विजयपर्व आधुनिकं नाटकं तर्हि प्राच्यदृश्यकाव्यत्वेन सह प्रायशो नाटकलक्षणस्य सायुज्यं न लक्ष्यते। अतः रामकुमारवर्मामहोदयस्य विजयपर्व इति नाटकमेकं स्वतन्त्रं विरचनं वक्तुं शक्यते। तथापि महाराजाभिराजराजेन्द्रमिश्रः विजयपर्व इति ग्रन्थं लोकप्रियनाटकरूपेणाख्यायितं कृतवान्। अतः संस्कृतकाव्यशास्त्राणां मतानुसारेणोच्यते यत् विजयपर्व तृतीयाङ्कविशिष्टं नाटकमेकम्। अन्तिमे इदमुच्यते ड.अभिराजराजेन्द्रमिश्रमहोदयः प्रख्यातः साहित्यिकोऽस्ति। तस्मादपि सः नाट्यकारकविरूपेण समधिकं प्रसिद्धोऽस्ति। स ऐतिहासिक-सामाजिकनाटकानां स्वविनिर्मितं कौशलमाविस्कृतवान्। भारतीयैतिहासिकोपादानादुपाख्यानं गृहीत्वा नाटकमिदं रचितवान्। तत्र नाटकेषु चरित्राणां यादृशी रूपरेखा विनिर्मिता यत् पाठकानां समृद्धमूल्यबोधस्य जागरणे सहायकं भवति। एवञ्च समकालस्य समस्यायाः समाधानं कर्तुं शक्यते। तस्य नाटकं भारतीयसंस्कृतेर्जातीयसम्बोधनस्य स्वरूपकात्मकम्।

**ग्रन्थपञ्जी**

**मूलसंस्कृतग्रन्थः**

1. विजयपर्व, अभिराजराजेन्द्रमिश्रः, संस्कृतभारती, प्रथममुद्रणम्, नवदेहली, २०११

**सहायकग्रन्थाः**

1. कङ्गले, आर, पि, *दि कौटिल्य अर्थशास्त्र* (खण्ड. १, २), मोतिलाल वानारसीदास पाब्लिशार्स प्राइभेट् लिमिटेड, दिल्ली, ८म पुणर्मुद्रणम्, २०१४
2. दाहाल, लोकमणि, द्विवेदी, त्रिलोकीनाथ, *साहित्यदर्पणः*(१-६ अध्यायः), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१७
3. पाण्डेय, उमेशचन्द्र, *याज्ञवल्क्यस्मृतिः*(व्यवहाराध्यायः), चौखम्वा संस्कृत संस्थान, वाराणसी, २०१४

[14] साहित्यदर्पणः(षष्ठःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी, कारिका संख्या-४,५,६, पत्राङ्कः-४६९

[15] दशरूपकम्(प्रथमः प्रकाशः), भोलाशंकर व्यासः, पत्राङ्कः-७

[16] तदेव, पत्राङ्कः-७

[17] दशरूपकम्(प्रथमः प्रकाशः), भोलाशंकर व्यासः, कारिका संख्या-११, पत्राङ्कः-७

[18] तदेव

[19] नाट्यशास्त्रम्(एकोनविंशोऽध्यायः), केदारनाथसाहित्यभूषणः(सम्पादकः), श्लोकसंख्या-२, पत्राङ्कः-३०८

[20] साहित्यदर्पणः(षष्ठःपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी, कारिका संख्या-४२, पत्राङ्कः-४९८

[21] भरतनाट्यशास्त्रम्(प्रथमखण्डः), प्रथमोऽध्यायः, सुरेशचन्द्र वन्द्योपाध्यायः,छन्दा चक्रवर्ती, श्लोकसंख्या-११४, पत्राङ्कः-१८

4. भट्टाचार्य, हरिदाससिद्धान्तवागीश, *महाभारतम्*(शान्तिपर्व, ३४), विश्ववाणी प्रकाशनी, कलिकाता, २य संस्करणम्, १४०० (बङ्गाब्द)
5. भादुड़ी, सन्ध्या, *रसगङ्गाधरः,* संस्कृत पुस्तक भाण्डार, कलिकाता, १३९८ (बङ्गाब्द)
6. विद्यासागर, जीवनानन्द, *नागानन्दम्,* सुपारिन्टेनडेण्ट फ्रि संस्कृत कलेज, कलिकाता, २य संस्करणम्, १८८६